# શ્રીરામચન્દ્રવેદપાદસ્તવઃ

Shri Ramachandravedapadastavah

sanskritdocuments.org

May 13, 2018

# Shri Ramachandravedapadastavah

# શ્રીરામચન્દ્રવેદપાદસ્તવઃ

## Sanskrit Document Information

Text title : rAmachandravedapAdastavaH

File name : rAmachandravedapAdastavaH.itx

Category : raama

Location : doc_raama

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 13, 2018

*sanskritdocuments.org*

# શ્રીરામચન્દ્રવેદપાદસ્તવઃ

(શ્રીભરદ્વાજમહર્ષિપ્રણીતઃ)

શ્રીમદ્રામં રઘૂત્તંસં સચ્ચિદાનન્દલક્ષણમ્ ।
ભવન્તં કરુણાવન્તં ગાયે ત્વાં મનસા ગિરા ॥ ૧॥

રામે દૂર્વાદલશ્યામે જાનકી કનકોજ્જ્વલા ।
ભાતિ મદ્દૈવતે મેઘે વિદ્યુલ્લેખેવ ભાસ્વરા ॥ ૨॥

ત્વદન્યં ન ભજે રામ નિષ્કામોઽન્યે ભજન્તુ તાન્ ।
ભક્તેભ્યો યે પુરા દેવા આયુઃ કીર્તિં પ્રજાં દદુઃ ॥ ૩॥

ભજનં પૂજનં રામ કરિષ્યામિ તવાનિશમ્ ।
શ્રિયં નેચ્છામિ સંસારાદ્ભયં વિન્દતિ મામિહ ॥ ૪॥

શ્રીરામ જાનકીજાને ભુવને ભવને વને ।
સ્વભક્તકુલજાતાનામસ્માકં ભવિતા ભવ ॥ ૫॥

રામ રામેતિ રામેતિ વદન્તં વિકલં ભવાન્ ।
યમદૂતૈરનુક્રાન્તં વત્સં ગૌરિવ ધાવતિ ॥ ૬॥

સ્વચ્છન્દચારિણં દીનં રામ રામેતિ વાદિનમ્ ।
ભવાન્મામનુનિમ્નેન યથા વારીવ ધાવતિ ॥ ૭॥

રામ ત્વં હૃદયે યેષાં સુખં લભ્યં વનેઽપિ તૈઃ ।
મણ્ડં ચ નવનીતં ચ ક્ષીરં સર્પિર્મધૂદકમ્ ॥ ૮॥

પ્રાર્થયે ત્વાં રઘૂત્તંસ મા ભૂન્મમ કદાચન ।
સર્વતીર્થેષુ સર્વત્ર પાપેભ્યશ્ચ પ્રતિગ્રહઃ ॥ ૯॥

સર્વે મદર્થં કુરુતોપકારં શ્રીરામમાકર્ણય કર્ણ નિત્યમ્ ।
મૂર્ધન્નમાલોકય નેત્ર જિહ્વે સ્તુહિ શ્રુતં ગર્તસદં યુવાનમ્ ॥ ૧૦॥

ભવાન્ રઘૂત્તંસ તુ દૈવતં મે યં સચ્ચિદાનન્દઘનસ્વરૂપમ્ ।

એકં પરં બ્રહ્મ વદન્તિ નિત્યં વેદાન્તવિજ્ઞાનસુનિશ્ચિતાર્થાઃ ॥ ૧૧॥

ભવત્કૃપાપાઙ્ગવિલોકિતેન વૈકુણ્ઠવાસઃ ક્રિયતે જનેન ।
જ્ઞાત્વા ભવન્તં શરણાગતોઽસ્મિ યસ્માત્પરં નાપરમસ્તિ કિઞ્ચિત્ ॥ ૧૨॥

દીનાન્ભવદ્ભક્તકુલપ્રસૂતાન્ભવત્પદારાધનહીનચિત્તાન્ ।
અનાથબન્ધો કરુણૈકસિન્ધો પિતેવ પુત્રાન્ પ્રતિ નો જુષસ્વ ॥ ૧૩॥

ભવાન્ ભવવ્યાઘ્રભયાભિભૂતં જરાભિભૂતં સહ લક્ષ્મણેન ।
સદૈવ માં રક્ષતુ રાઘવેશઃ પશ્ચાત્પુરસ્તાદધરાદુદસ્તાત્ ॥ ૧૪॥

var રક્ષ રાઘવેશ - રક્ષતુ રાઘવેશઃ
કામાદ્યપથ્યેન વિવર્ધમાનં રોગં મદીયં ભવનામધેયમ્ ।
દૂરીકુરુ ત્વં યદહં ત્રિલોક્યાં ભિષક્તમં ત્વાં ભિષજાં શૃણોમિ ॥ ૧૫॥

શ્રીરામચન્દ્રઃ સ જયત્યજસ્રં લઙ્કાપુરીદ્રોણગિરૌ પયોધૌ ।
યસ્ય પ્રસાદાદભવદ્ધનૂમાનણોરણીયાન્મહતો મહીયાન્ ॥ ૧૬॥

શ્રીરામ રામેતિ રઘૂત્તમેતિ નામાનિ જલ્પેદ્યદિ તસ્ય તત્ક્ષણાત્ ।
દિશો દ્રવન્ત્યેવ યુયુત્સવઃ સદા ભિયં દધાના હૃદયેષુ શત્રવઃ ॥ ૧૭॥

અનાદિમવ્યક્તમનન્તમાદ્યં સ્વયં પરં જ્યોતિષમપ્રમેયમ્ ।
વિલોકયે દાશરથે કદા ત્વામાદિત્યવર્ણં તમસઃ પરસ્તાત્ ॥ ૧૮॥

શ્રીરાઘવ સ્વીયપદારવિન્દે સેવાં ભવાન્નઃ સતતં દદાતુ
વયં સ્વજન્માન્તરસઞ્ચિતાનિ યયાતિ વિશ્વા દુરિતા તરેમ ॥ ૧૯॥

ભો ચિત્ત ચેત્કામયસે વિભૂતિં તમેવ સમ્પ્રાર્થય વીરમેકમ્ ।
રઘૂત્તમં શ્રીરમણં સદા યઃ શ્રીણામુદારો ધરુણો રયીણામ્ ॥ ૨૦॥

વન્દેઽરવિન્દેક્ષણમમ્બુદાભમાકર્ણનેત્રં સુકુમારગાત્રમ્ ।
યં જાનકી હર્ષયતી વનેઽપિ પ્રિયં સખાયં પરિષસ્વજાના ॥ ૨૧॥

સીતાજાને નૈવ જાને ત્વદન્યં ત્યક્તશ્રીસ્ત્રીપુત્રકામઃ સદાઽહમ્ ।
ત્વાં સ્મૃત્વાઽન્તે દેવયાનાધિરૂઢસ્તત્ત્વાયામિ બ્રહ્મણા વન્દમાનઃ ॥ ૨૨॥

અહં ભરદ્વાજમુનિર્નિરન્તરં શ્રીરામમેકં જગદેકનાયકમ્ ।
સંવર્ણયે કાવ્યરસાદિવિત્તમં કવિં કવીનામુપમશ્રવસ્તમમ્ ॥ ૨૩॥

પઠન્તિ સ્તુતિં યે નરા ઋદ્ધિકામાઃ
સમૃદ્ધિં ચિરાયુષ્યમાયુષ્યકામાઃ ।

લભન્તે હ નિસ્સંશયં પુત્રકામાઃ
    લભન્તે હ પુત્રાન્ લભન્તે હ પુત્રાન્ ॥ ૨૪॥

વેદપાદાભિધસ્તોત્રં સ્નાત્વા ભક્ત્યા સકૃન્નરઃ ।
યઃ પઠેદ્રાઘવસ્યાગ્રે જીવાતિ શરદઃ શતમ્ ॥ ૨૫॥

ઇતિ શ્રીભરદ્વાજમહર્ષિપ્રણીતઃ શ્રીરામચન્દ્રવેદપાદસ્તવઃ સમાપ્તઃ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*Shri Ramachandravedapadastavah*

pdf was typeset on May 13, 2018

Please send corrections to *sanskrit@cheerful.com*